# आदर्शप्रश्नपत्रम् (2023-24)

**कक्षा - द्वादशी** **कोड न. - 526**

**SET : A**

रोल नं० | | | | | | | | | | |

# संस्कृतम्

समयः - होरात्रयम् ] [ पूर्णाङ्काः - 80

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 9 तथा प्रश्न 14 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना / पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

---

- **सामान्यनिर्देशाः :–**

I. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
II. प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
III. श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति :–**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 18 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 30 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 06 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 16 अङ्काः |

## खण्डः ‘क’

## अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत - 10

गङ्गा सर्वासां नदीनां श्रेष्ठा अस्ति। सा लोकत्रयस्य कल्याणकारिणी अस्ति। सा भौतिकसुखदृष्ट्या आध्यात्मिक सुखदृष्ट्या कल्याणप्रदा । यः गङ्गां पूर्णरूपेण समर्पितो भवति, तस्य जीवनं धन्यं भवति। इह संसारे यः जनः राज्ञा भगीरथेन आनीतां भगवतीं गङ्गां सदा वन्दते स एव शोभनः चतुरश्च कथ्यते । यः जनः आदरपूर्वकं जह्नुतनयां मनसा ध्यायति, स एव सम्यक् तपस्वी भवति। यः गङ्गायाः नामानि गुणान् च सदा स्मरति । स एव श्रेष्ठः पुरुषः कथ्यते । यस्य जनस्य देवनदीं प्रति सेवाभावना अस्ति, यथार्थरूपेण स एव कर्मयोगी अस्ति, स एव सर्वेषां स्वामी भवति।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(क) सर्वासां नदीनां श्रेष्ठा नदी का अस्ति?
(ख) इह संसारे गङ्गा कः आनीतवान्?
(ग) यः जनः आदरपूर्वकं जह्नुतनयां ध्यायति सः कः भवति?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(क) कस्य जीवनं धन्यं भवति?

(ख) कः श्रेष्ठः पुरुषः कथ्यते?

(ग) कः सर्वेषां स्वामी भवति?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1

(द) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नत्रयम् ) 3×1=3

(i) 'चतुरः' इत्यस्य शब्दस्य विलोमपदं किम्?
(क) बुद्धिमान् (ख) मूर्खः
(ग) प्रवीणः (घ) पण्डितः

(ii) 'राज्ञा' इत्यस्मिन् शब्दे का विभक्तिः?
(क) चतुर्थी (ख) पञ्चमी
(ग) तृतीया (घ) सप्तमी

(iii) 'पुरुषः' इत्यस्य विशेषणपदं किम्?
(क) सदा (ख) कर्मयोगी
(ग) जनः (घ) श्रेष्ठः

(iv) 'जनस्य' इत्यस्मिन् शब्दे का विभक्तिः?
(क) चतुर्थी (ख) पञ्चमी
(ग) सप्तमी (घ) षष्ठी

# खण्डः 'ख'

# रचनात्मक-कार्यम्

2. विषयमेकमधिकृत्य षड्वाक्यानि संस्कृतभाषया लिखत - 6

(क) अनुशासनम्

(ख) मम प्रियः कविः

(ग) संस्कृतभाषायाः महत्त्वम्

(घ) परोपकारः

## (छन्द-अलङ्कार-परिचयः)

3. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत- (केवलं प्रश्नत्रयम्) 2×3=6

(क) अनुष्टुप्-छन्दसः लक्षणं किम्?

(ख) वसन्ततिलकाछन्दसः उदाहरणं किम्?

(ग) मालिनीछन्दसि कति वर्णाः भवन्ति?

(घ) ............... यमनसभलागः शिखरिणी । (लक्षणस्य रिक्तस्थानपूर्तिं कुरुत)

4. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत- (केवलं प्रश्नत्रयम्) 2×3=6

(क) अनुप्रासस्य अलङ्कारस्य लक्षणं किम्?

(ख) यमकस्य अलङ्कारस्य उदाहरणं किम्?

(ग) उत्प्रेक्षायाः अलङ्कारस्य लक्षणं किम्?

(घ) श्लिष्टैः पदैरनेकार्थाभिधाने ......................। (लक्षणस्य रिक्तस्थानपूर्तिं कुरुत)

# खण्डः 'ग'

# पठित-अवबोधनम्

5. अधोलिखितपद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।।

**अथवा**

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।

स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।

6. अधोलिखितगद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्। न ह्येवं विधमपरिचितमिह जगति किञ्चिदस्ति यथेयमनार्या। लब्धापि खलु दुःखेन परिपाल्यते। परिपालितापि प्रपलायते। न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमालोकयते। न कुलक्रममनुवर्तते।

**अथवा**

मासोऽयमाषाढः, अस्ति च सायं समयः, अस्तं जिगमिषुर्भगवान् भास्करः सिन्दूर-द्रव-स्नातानामिव वरुण- दिगवलम्बिनामरुण-वारिवाहानामभ्यन्तरं प्रविष्टः। कलविङ्काश्चाटकैर-रुतैः परिपूर्णेषु नीडेषु प्रतिनिवर्तन्ते।

7. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) कार्यं वा साधयेयम् देहं वा पातयेयम्।

(ख) सुलभसौख्यमिदं बालत्वं भवति।

(ग) योगः कर्मसु कौशलम्।

(घ) दिदेश कौत्साय समस्तमेव।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

असूर्या नाम ते लोका अन्धेन तमसावृत्ताः।

ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।।

**अन्वयः :-**

ते लोकाः 1) .............. तमसा आवृत्ताः 2) ..................... नाम। ये के च आत्महनः 3) .................

ते तान् 4) ..................... अभिगच्छन्ति।

**मञ्जूषा**

| असूर्या, प्रेत्य, अन्धेन, जनाः |
|---|

8. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि श्लोकात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत -
(केवलं प्रश्नत्रयम्) 3×1=3

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्।।

**प्रश्नाः -**

(क) बुद्धियुक्तः के उभे जहाति?

(ख) 'योगाय' इत्यस्मिन् पदे का विभक्तिः?

(ग) 'कर्मसु' इति पदं कस्मिन् वचने अस्ति?

(घ) 'जहातीह' इत्यस्य पदस्य सन्धिच्छेदं कुरुत।

9. अधोलिखितं गद्याशं पठित्वा प्रश्नानां उत्तराणि गद्यांशात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत -
(केवलं प्रश्नत्रयम्) 3×1=3

एवं चतुर्णां परस्परं विवादो लग्नः। ततो ब्राह्मणो राजसमीपमागत्य चतुर्णां विवादवृत्तान्तमकथयत्। राजापि तच्छ्रुत्वा तस्मै ब्राह्मणाय चत्वार्यपि रत्नानि ददौ। इति कथां कथयित्वा पुत्तलिका राजानमवदत् , 'भो राजन्, त्वय्येवंविधसहजमौदार्यं विद्यते चेदस्मिन् सिंहासने समुपविश।'

(क) केषां विवादो लग्नः?

(ख) रत्नानि कस्मै ददौ?

(ग) 'राजापि' इत्यस्मिन् पदे कः सन्धिः?

(घ) 'कथयित्वा' इत्यस्मिन् पदे कः प्रत्ययः?

10. कोष्ठकाद् उपयुक्तशब्दं चित्वा रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्)

4×1=4

| | |
|---|---|
| (क) ये अविद्याम् उपासते। | (काम् / कासाम्) |
| (ख) लब्धापि खलु दुःखेन परिपाल्यते। | (केन / केभ्यः) |
| (ग) केयूराणि न भूषयन्ति। | (कानि / काणि) |
| (घ) योगः कर्मसु कौशलम्। | (कासु / केषु) |
| (ङ) वरतन्तुशिष्यः रघोः उदारां गाम् अश्रृणोत्। | (कस्य / कस्याः) |

## (संस्कृत-साहित्य-परिचयः)

11. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) वेदाः कति सन्ति?

(ख) उत्तररामचरितस्य रचयिता कः?

(ग) महाभारतस्य रचयिता कः?

(घ) श्रीमद्भगवद्गीतायां कति श्लोकाः सन्ति?

(ङ) रामायणे कति काण्डानि सन्ति?

12. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) अम्बिकादत्तव्यासस्य प्रसिद्धा रचना का ?

(ख) 'रघुकौत्ससंवादः' इति पाठः कस्मात् ग्रन्थाद् उद्धृतः ?

(ग) आदिकविना वाल्मीकिना कः ग्रन्थः रचितः?

(घ) बाणभट्टस्य रचनायाः नाम किम् ?

(ड.) कालिदासस्य प्रसिद्धं नाटकं किम् ?

## खण्डः – 'घ'

## अनुप्रयुक्त-व्याकरणम्

13. (क) गुणसन्धेः अथवा व्यञ्जनसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ख) तत्पुरुषसमासस्य अथवा द्विगुसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(घ) कर्मकारकस्य अथवा अपादानकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

## खण्डः – 'ङ'

## पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

14. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 16×1=16

1) 'अन्यथेतः ' इत्यस्य शब्दस्य कः सन्धिच्छेदः?

क. अन्यथ+एतः    ख. अन्य+ थेतः

ग. अन्यथा+एतः    घ. अन्यथा+इतः

2) 'जहातीह' इत्यस्मिन् शब्दे कः सन्धिः?

क. गुणसन्धिः    ख. दीर्घसन्धिः

ग. अयादिसन्धिः    घ. वृद्धिसन्धिः

3) 'नोपसर्पति' इत्यस्य शब्दस्य कः संधिच्छेदः?

क. नोप+सर्पति    ख. नः+उपसर्पति

ग. न+ओपसर्पति    घ. न+ उपसर्पति

4) 'तीर्त्वा' इत्यस्मिन् शब्दे कः प्रत्ययः?

क. त्वा    ख. ईर्त्वा

ग. क्त्वा    घ. तव्यत्

5) 'लब्धम्' इत्यस्मिन् शब्दे कः प्रत्ययः?

क. तुमुन्    ख. क्त्वतु

ग. क्त्वा    घ. क्त

6) 'पटु+तल्' एतयोः संयोगे किं रूपम्?

क. पटुतरः    ख. पटुते

ग. पटुता    घ. पटुतले

7) 'दीर्घग्रीवः' इत्यस्मिन् शब्दे कः समासः?

क. तत्पुरुषसमासः    ख. बहुव्रीहिसमासः

ग. अव्ययीभावसमासः    घ. द्वन्द्वसमासः

8) 'वाक्पटुता' इत्यस्य शब्दस्य कः विग्रहः?

क. वाक् पटुता    ख. वाच् पटुता

ग. वाचि पटुता
घ. वाचे पटुता

9) 'राज्ञः समीपम्' अनयोः शब्दयोः समस्तपदम् किम्?

क. राज्ञेसमीपम्
ख. राज्ञोसमीपम्
ग. राज्ञासमीपम्
घ. उपराजम्

10) 'गुरुणा' इत्यस्मिन् शब्दे का विभक्तिः?

क. तृतीया
ख. चतुर्थी
ग. पंचमी
घ. षष्ठी

11) 'कर्मसु' इत्यस्मिन् शब्दे का विभक्तिः?

क. द्वितीया
ख. तृतीया
ग. षष्ठी
घ. सप्तमी

12) 'जगत्' इत्यस्य शब्दस्य पर्यायपदं किम्?

क. ईश्वरः
ख. मानवः
ग. संसारः
घ. कर्मः

13) 'उदाराम्' इत्यस्य शब्दस्य विलोमपदं किम्?

क. अदाराम्
ख. अनदाराम्
ग. उदरम्
घ. अनुदाराम्

14) 'निकृष्टः' इत्यस्य शब्दस्य विलोमपदं किम्?

क. मूर्खः
ख. बुद्धिहीनः
ग. मुढः
घ. श्रेष्ठः

15) 'समतिक्रामत्सु' इत्यस्य शब्दस्य विशेष्यपदं किम्?

क. दिवसेषु
ख. यौवनप्रभवम्
ग. दोषजातम्
घ. लक्ष्मीमदः

16) 'वर्षत्रयस्य' इत्यस्य शब्दस्य विशेषणपदं किम्?

क. संतुलितः
ख. गतस्य
ग. विस्मृतः
घ. विविधः